# ॥ श्रीवेङ्कटेशस्तुतिः ॥

श्रीवेङ्कटलसच्छैलवासी दासीकृतामरः ।
छायया पातु मां नित्यं श्रीनिवाससुरद्रुमः ॥ १ ॥

दृष्टादिशि दिशि स्वीयान् दयया पालयन्निव ।
वर्तते विश्वतश्चक्षुर्वेङ्कटे वेङ्कटेश्वरः ॥ २ ॥

ये शङ्खचक्रोज्ज्वलबाहुयुग्माः
स्वांघ्रिं भजन्ते भवसिन्धुरेषाम् ।
कटिप्रमाणस्त्विति वेङ्कटेशः
स्फुटिकरोत्यात्मकराम्बुजातैः ॥ ३ ॥

प्रायोऽन्यत्र गतां श्रियं निजवशां कर्तं मुहुः कांक्षितं
भक्तानां प्रदिशन् धनं प्रतिदिनं संसाध्य साध्यप्रियः ।
तत् तत्रैव पुनः सहस्रगुणितं पश्यन् घनश्यामलः
तेषां वेश्मसु विस्मितो निवसति श्रीवेङ्कटेशोऽनिशम् ॥ ४ ॥

आरूढगरुडस्कन्धमालिङ्गितरमाधरम् ।
अनमज्जनसर्वस्वमाश्रये वेङ्कटेश्वरम् ॥ ५ ॥

कशिपूकृत्य यं शेते गिरीकृत्याधिष्ठति ।
अवतीर्णोऽनुजीकृत्य स तद्भक्ताग्रणीः फणी ॥ ६ ॥

शङ्कररविशशिमुख्याः किन्करपदवीमुपाश्रिता यस्य ।
वेङ्कटगिरिनाथोऽसौ पङ्कजनयनः परात्परो जयति ॥ ७ ॥

श्रीवेङ्कटगिरिद्रोणी क्षोणी यस्यानणीयसी ।
तं वरेण्यं सुराग्रण्यं वेदगम्यं भजामहे ॥ ८ ॥

श्रीवेङ्कटपते दीनगते रम्याकृते क्षितौ ।
समः समस्तमर्त्यार्तिप्रमर्दन किमस्ति ते ॥ ९ ॥

समस्तसुजनाधारं दोषदूरं गुणाकरम् ।
श्रीवेङ्कटाचलावासं श्रीनिवासं भजेऽनिशम् ॥ १० ॥

आनन्दतीर्थवरदे दानवारण्यपावके ।
ज्ञानदायिनि सर्वेशे श्रीनिवासेऽस्तु मे मनः ॥ ११ ॥

॥ इति श्रीवादिराजतीर्थविरचित तीर्थप्रबंधे श्रीवेङ्कटेशस्तुतिः ॥